
# कर्मकाण्डसंस्कारविज्ञानम्




प्रधानसम्पादकः
**प्रो. अर्कनाथचौधरी**

सम्पादकः
**डॉ. शत्रुघ्नपाणिग्राही**

सहसम्पादकः
**डॉ. अश्विन का. राजगोरः**

# कर्मकाण्डसंस्कारविज्ञानम्

(महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, श्रीसोमनाथसंस्कृतियुनिवर्सिटी, तथा सन्तश्रीसन्ध्यागिरिबापुसंस्कृतवेदविद्यालयः, इत्येषां संयुक्ततत्त्वावधाने समायोजिता त्रिदिवसीया अखिलभारतीयवेदसङ्गोष्ठ्यां प्रस्तुतशोधपत्राणां संग्रहः)


**प्रधानसम्पादकः**

प्रो. अर्कनाथचौधरी

**सम्पादकः**

डॉ. शत्रुघ्नपाणिग्राही

**सहसम्पादकः**

डॉ. अश्विन का. राजगोरः



**प्रकाशकः**

डॉ. महेन्द्रकुमार अं. दवे
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवनरोड, वेरावलम्–३६२ २६६.
गीर–सोमनाथजनपदम्, गुजरातम्
दूरभाषा : ०२८७६–२४४५३२
**E-mail :** sssu.veraval@gmail.com

## कर्मकाण्डसंस्कारविज्ञानम्

(महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, श्रीसोमनाथसंस्कृतियुनिवर्सिटी, तथा सन्तश्री सन्ध्यागिरिबापुसंस्कृतवेदविद्यालयः, इत्येषां संयुक्ततत्त्वावधाने समायोजिता त्रिदिवसीया अखिलभारतीयवेदसङ्गोष्ठ्यां प्रस्तुतशोधपत्राणां संग्रहः)

### आयोजकसंस्थाः

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
सन्तश्री सन्ध्यागिरिबापुसंस्कृतविद्यालयः

### संरक्षकाः

पू. सन्तश्रीभगवद्गिरी बापु
प्रो. अर्कनाथचौधरी
प्रो. विरूपाक्षजडिपालः


### प्रकाशकः

डॉ. महेन्द्रकुमार अं. दवे
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवन रोड, वेरावलम्–३६२ २६६.

ISBN : 978-93-83097-23-4

प्रतिलिपयः – ५००
प्रकाशनवर्ष–२०१७
प्राप्तिस्थानम् – सन्तश्री सन्ध्यागिरिबापुसंस्कृतवेदविद्यालयः,
सामख्याली, कच्छ, गुजरातम् तथा
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, राजेन्द्रभुवन रोड, वेरावलम्–३६२ २६६.

### मुद्रणम्:

**जलाराम ग्राफीक्स अेन्ड ओफसेट**
**परमहंस अेपार्टमेन्ट के पास, होटल कावेरी के पीछे,**
**अेस टी रोड, वेरावल - ३६२ २६६.**
**फोन : (०२८७६) २२१८६१**

## अनुक्रमणिका



| क्रमांक: | विषय: | नाम | पृष्ठ: |
|---|---|---|---|
| २८. | वैदिकवाङ्मय में गौ | डॉ. गिरिधारी पण्डा | ८३-८४ |
| २९. | अग्निहोत्रम्-एकं परिशीलनम् | डॉ. निरञ्जनमिश्र: | ८५-८७ |
| ३०. | यज्ञादिकर्मणां ब्रह्मविचारे उपयोग: | डॉ. जानकीशरण: आचार्य: | ८८-९१ |
| ३१. | दार्शनिकदृष्ट्या यज्ञस्वरूपम् | डॉ. बी. उमामहेश्वरी, | ९२-९५ |
| ३२. | गो-माहात्म्यम् | डॉ. सङ्कल्पमिश्र: | ९६-९९ |
| ३३. | वेदे आदर्शदाम्पत्यजीवनम् | डॉ. गिरीजाप्रसाद शडङ्गी | १००-१०४ |
| ३४. | वेदे गोमहत्त्वम् | प्रा. डॉ. राजेन्द्रकुमार जे पण्डया | १०५-१०८ |
| ३५. | वेद शास्त्रो में गाय | डॉ. अमीषा एच. दवे | १०९-११० |
| ३६. | वेदप्रणीतगृहस्थाश्रमसिद्धान्ता: | राजगोर रविशंङ्कर: कुम्भाभाइ | १११-११४ |
| ३७. | संस्कारेषु विज्ञानम् | व्यास पन्नालाल धर्मचन्द | ११५-११७ |
| ३८. | अग्निहोत्र यज्ञ | श्रीविपुलजादव: | ११८-१२१ |
| ३९. | समावर्तनसंस्कारस्य माहात्म्यम् | राजपरा मनिष: | १२२-१२४ |
| ४०. | श्राद्धतत्त्वम् – कालसर्वस्वोक्तदिशा | शुभश्री त्रिपाठी | १२५-१२९ |
| ४१. | अथर्ववेदे गो: विश्वरूपदर्शनम् | हार्दिक: डि कल्याणि | १३०-१३२ |
| ४२. | सन्ध्यावन्दनम् | श्री दुर्गाशरणरथ: (शोधच्छात्र:) | १३३-१३५ |
| ४३. | भारतीयसंस्कृतौ गोर्महत्त्वम् | डॉ. दुर्गाचरणषडङ्गो | १३६-१४१ |
| ४४. | अग्निहोत्रयाग: | डॉ. अश्विन का. राजगोर | १४२-१४४ |
| ४५. | गो-तत्त्वम्, तस्या: यागे योगदानम्, गोर्महत्वञ्च | डॉ. पङ्कजकुमार एस. रावल | १४५-१४९ |
| ४६. | शास्त्रपरम्परा में गो माता का विचार | डॉ. प्रशान्तकुमारपण्डा | १५०-१५२ |
| ४७. | वेदेषु गोतत्वविचार: | डॉ. ज्ञानरंजनपण्डा | १५३-१५७ |
| ४८. | आधुनिकसमाजे यज्ञानां प्रासङ्गिकता | डॉ. सोमनाथदाश: | १५८-१६१ |
| ४९. | वैदिक कर्म | पू. स्वामी स्वयंप्रकाशगिरि | १६२-१६३ |
| ५०. | अग्निहोत्रयागस्य वैशिष्ट्यम् | जोषी केवल: | १६४-१६५ |
| ५१. | Science behind Karmakand - | Prof. D.N.Pandeya | १६६-१७० |
| ५२. | Ved is the Embodiments of Refinement | Shree Rajkishor Ojha | १७१-१७२ |

## दार्शनिकदृष्ट्या यज्ञस्वरूपम्

डॉ. बी. उमामहेश्वरी,

कर्मसिद्धन्तोऽयं नरं देवञ्च वज्रपातमिव त्रासयति । कृतं कर्म क्षणान्तरे वा जन्मान्तरे वा युगान्तरे वाऽपि अवश्यं फलदायी भवति । तत्फलं कर्त्रा अवश्यमनुभोक्तव्यमेव । नात्र व्याजस्य स्थानं वर्तते । कृतं कर्म क्षणान्तरे नश्यति, तथा चेत् कालान्तरे जन्मान्तरे वा कथं फलदायीति केचित् कथयन्ति । तत्र प्रथमं अद्यतन कर्मणः फलं कालान्तरे कथं भवतीति विषयात्पूर्वं अद्यतनकर्मफलसुखदुःखनिमित्तं पूर्वकृतकर्म कारणत्वेनोच्यते । तथा हि न्यायशास्त्रे-प्रस्तुतग्रन्थसमाप्तिरूपफलस्य जन्मान्तरकृत मङ्गलरूपात्मकशुभकर्म कारणत्वेनानुमन्यते, यथा किरणावल्यां ग्रन्थाद्बहिरेव मङ्गलात्मककर्म कृतमिति, अस्मिन् जन्मनि कृतकर्म, एवं नास्तिकादीनां ग्रन्थेषु जन्मान्तरकृत मङ्गलकर्म कारणमिति मन्यन्ते । साम्प्रतकर्मणः कारणं क्षणात्पूर्वं दिनात्पूर्वं वत्सरात्पूर्वं जन्मनः पूर्वं वा स्यात् । नात्र कालनियमो देशनियमो वा वर्तते ।

तथैव सद्यः कर्मणः फलं क्षणादूर्ध्वं वा वत्सरादूर्ध्वं वा जन्मनः परं वा यत्र कुत्रापि भवेदेव । यथा मीमांसाशास्त्रे कर्म इति याज्ञिककर्म एव मुख्यतया मन्यते । अत्र कर्म द्विधा उच्यते-प्रत्यक्षफलदायी, परोक्षफलदायी चेति । प्रत्यक्षफलदायी याज्ञिककर्म कारीरियागः, पुत्रकामेष्ठि, आभिचारिकयागादि । तत्र कारीरियागे दृष्टफलं वृष्टिः, पुत्रकामेष्ठियागे प्रत्यक्षफलं पुत्रः, आभिचारिकयागे च अपरोक्षफलं शत्रुनाशः दृश्यते । परोक्षफलदायी याज्ञिककर्म - दर्शपूर्णमासयागः, राजसूययागः, अश्वमेधयागादि । दर्शपूर्णमासयागे अदृष्टफलं स्वर्गः वर्तते । राजसूययागस्य अदृष्टफलं स्वर्गे विशेषवासः वर्तते । शताश्वमेधयागस्य अदृष्टफलं इन्द्रपदमिति प्रसिद्धम् । अत्र कर्मद्वये दृष्टाऽदृष्टफलद्वयमपि विद्यते किन्तु मुख्यत्व गौणत्वकारणात् कर्मद्वयमेवोच्यते ।

तथा च कारीरीपुत्रकामेष्ट्यादि यागकर्मणां मुख्यफलं वृष्टिपुत्रादि, गौणफलं च जन्मान्तरे सुखहेतुर्भवति । एवं दर्शपूर्णमासराजसूयादि यागकर्मणां मुख्यफलं देहानन्तरं स्वर्गप्राप्तिः, गौणफलञ्च वसुन्धरायाः सस्याश्यमलत्वम्, वसुन्धरावसतां द्विपदां चतुष्पदां च सुखशान्तिः ।

**नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।**

**अवश्यमनुभोक्तव्यं कृतं कर्म शुभाऽशुभम् ।।**

इत्यार्षोक्तिरपि प्रसिद्धा अनुभूता च । इत्येतावता कर्मफलम् अवश्यमनुभोक्तव्यमिति सिद्धम् । आशुतरविनाशिकर्म कृतक्षणादारभ्य फलप्राप्तिपर्यन्तं कथं स्थीयते ? इति केचन दार्शिनिकाः आक्षेपिताः । सत्यम्, कर्म आशुतरविनाशी, कर्मणि नष्टे सति विहितनिषिद्धकर्मणां तत्तद्वाक्यैस्तत्तत्फलसाधनत्वे अवगते आशुतरविनाशिनां कर्मणां कालान्तरभाविफलसाधनत्वोपपत्तिमन्तरा पुण्यपापरूपमपूर्वं कल्प्यते ।

ततश्च यागादि कर्मणां अपूर्वद्वारा स्वर्गसाधनत्वम्, न साक्षात् । एवम् अपूर्वस्यैव पर्यायवाचि पदानि अन्याचार्यैः उक्तानि अदृष्टभाग्यविधिपुण्यादीनि । अत्र पिपासानिवृत्तिकारणं किमिति पृष्टे सति जलमित्येकेन अम्बुरित्यपरेण उदकमित्त्येकेनोक्तवत्प्रतिभाति । कारणरूपयाज्ञिककर्मफलरूपस्वर्गं प्रति न साक्षात्कारणमिति लौकिकदृष्टान्तो यथा-आम्रफलं प्रति आम्रबीजं न साक्षात्कारणम् । बीजादङ्कुरोत्पत्तिः अङ्कुरात् शाखोत्पत्तिः शाखोदुपशाखोत्पत्तिः, उपशाखात्पुष्पोत्पत्तिः, पुष्पात् शलाटोत्पत्तिः शलाटोः आम्रफलमुत्पद्यते । नात्र आम्रफलं प्रति आम्रबीजं साक्षात्कारणमिति वक्तुं शक्यते । अपि च यद्यपि आम्रफलं प्रति आम्रबीजं साक्षात्कारणं नास्तीति न तत् कारणमिति वक्तुं शक्यते । यतो हि आम्रफलाय आम्रबीजं परम्परया मूलकारणत्वात् । तथैव स्वर्गं प्रति यज्ञकर्म पारम्पर्यमूलकारणम् । तत्राऽपूर्वस्य लौकिकदृष्टान्तो यथा - यथा हि चैत्रवैशाखीयप्रचण्डमार्ताण्डः श्रावणभाद्रपदवृष्टेः कारणं तथा । ज्येष्ठाषाढयोः वृष्टिकारणीभूतमेघाः न दृश्यते । अदृष्टरूपेण सूक्ष्मरूपेण च वायुमण्डले भ्रमन् सन्तः श्रावणभाद्रपदमासयोः मेघरूपेण परिणम्य वृष्टिर्वर्षति । अत्र वृष्टेः मूलकारणं चैत्रवैशाखीय तप्तमार्तण्ड एव । अत्र तप्तमार्तण्डः एव कर्म । तेन मासद्वयात्परं वर्षमानवृष्टिः फलम् । मध्ये मासद्वयं अपूर्वरूपेण स्थीयते ।

अत्र पूर्वमीमांसा शास्त्रे देवता मन्त्रमयी न विग्रहवती । तर्हि प्रति मन्त्रस्य पृथग्रूपेण ऋषिः, छन्दः, देवता अवश्यं विद्यते । सवितृमन्त्रस्य यदि मन्त्रवती सविता इत्युच्यते तर्हि प्रत्यक्षविरुद्धं भवति । मन्त्रः पृथक् **"तत्सवितुर्वरेण्यम्"** इति मन्त्रस्य सवितादेवता प्रत्यक्षतया अस्मदक्षिगोचरो भवति । तत्र मन्त्रो यथा – **"आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च । हिरण्मयेन सविता रथेन देवो याति भुवनानि पश्यन्"** इति गगने विराजमानः गोलाकृतिप्रचण्डभास्करः देवता ।

* **अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ।** इति अग्निमन्त्रः, इन्धनसंयोगजनितसर्वभस्मीकरः दृष्टिगोचरः अग्निदेवता भिन्ना ।

* **आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ।** इति चन्द्रमन्त्रः, शुक्लयपक्षे प्रतिपदारभ्य प्रतिदिनं प्रवर्धमानः अस्मदालोकनाह्लादकरो चन्द्रदेवता भिन्ना ।

* **बृहस्पते अतिय दर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवस ऋृत प्रजातदस्मा सुद्रविणं धेहि चित्रम्** इति बृहस्पतिमन्त्रः, गुरुवक्रदशायां गुरोरदर्शनम्, पश्चाद्दर्शनमिति गुरुः भिन्नः ।

* **शुक्रं ते अन्यद्यजतं ते अन्यद् विषुरूपे अहनी द्यौरिवासि । विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह राति रस्तु**[३] इति मन्त्रः, शुक्रवक्रदशायां शुक्रस्याऽदर्शनम्, पश्चाद्दर्शनमिति शुक्रः भिन्नः ।

* सप्तविंशतिनाक्षत्रिकमन्त्राः, तद्भिन्नत्वेन सप्तविंशति नक्षत्राणि भिन्नानि । एतावन्तः मन्त्राः, एतावत्यः देवताश्च प्रत्यक्षतया भिन्नभिन्नतया च परिदृश्यन्ते । तथापि कर्मकाण्डे मन्त्रस्य मन्त्रदेवतायाः च अभेदः कथं सिध्यति? तथा च कलशप्रतिष्ठापनावसरे देवतानां आह्वानोद्वासनादि क्रियाः अपि विधीयन्ते, तत्रापि मन्त्रदेवतयोः भेदः प्रत्यक्षं भवति । तथा च देवता न मन्त्रमयी न विग्रहमयी अपि तु दिव्यशक्तिमयी ।

अलौकिकसुखप्राप्त्यर्थं लौकिकश्रेष्ठतमसुखं प्राप्तुं यज्ञं तनुते । इज्यते हविर्दीयतेऽत्र इति यज्ञः । यज् भावे न । यज्+यजयाचयतविच्छप्रच्छ–रक्षो नङ् (पाणिनीय सूत्रम् – ३.३.९०) यज्ञ इति यज्ञ शब्दस्योत्पत्तिप्रकारः । यज्ञ इति पुंलिङ्गशब्दः । तस्यैव **सव–अध्वर–याग–सप्ततन्तु–मख–क्रतु–इष्टि–वितान–स्तोम–मन्यु–संस्तर–स्वरु–सत्र–इवेत्यादयः समानार्थकशब्दाः ।**

**यज्ञः सवोऽध्वरोयागः सप्ततन्तुर्मखः क्रतुः ।**[४]

यज्ञेन हि देवा दिवं गताः । यज्ञेनासुरा नपानुदन्त । यज्ञेन द्विषन्तो मित्रा भवन्ति । यज्ञे सर्वं प्रतिष्ठितम् । तस्माद्यज्ञं परमं वदन्ति ।[५] अर्थात् अमराः यज्ञकर्मद्वारा एव स्वर्गं प्राप्ताः । यज्ञेनैव असुराः दूरीकृताः । यज्ञकर्मणा विवादमाना अपि मित्राणि भवन्ति । अतः सर्वश्रेष्ठतमं यज्ञमिति प्रकीर्त्यते । तथा सर्वमपि यज्ञे सुप्रतिष्ठितम् । स च यज्ञः पञ्चविधः । **ब्रह्मयज्ञः, पितृयज्ञः, देवयज्ञः, भूतयज्ञः, नृयज्ञः** इति ।

**पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः ।**

**एते पञ्चमहायज्ञा ब्रह्मयज्ञादिनामकाः ।।**[६]

**अध्यापनं ब्रह्मयज्ञं पितृयज्ञस्तु तर्पणम् ।**

**होमो दैवो बलिर्भूतो नृयज्ञोऽतिथिपूजनम् ।।**[७]

षडङ्गसहितवेदाध्ययनं अध्यापनञ्च ब्रह्मयज्ञः, अमापूर्णायां देवताऽर्षिपितृनुद्दिश्य तर्पणादिकं देवताऽर्षिपितृणां यज्ञः । अश्वमेधराजसूयवाजपेयदर्शपूर्णमासादयः देवयज्ञाः । नित्यं गृहस्थकर्तव्यपञ्चयज्ञान्तर्गते बलिवैश्वदेवकर्मणि वायसानुद्दिश्य बलिहरणं भूतयज्ञः **(भूतेभ्यो बलिहरणं भूतयज्ञः )** ।[८] तथा अज्ञातकुलशीलगोत्रजनमुद्दिश्य वैश्वदेवबलिपूर्वमेव अन्नदानादिसत्कारः नृयज्ञः ।

**यस्य न ज्ञायते नाम न च गोत्रं न च स्थितिः ।**

**अकस्मात् गृहमायाति सोऽतिथिर्प्रोच्यते बुधैः ।।**[९] इति पञ्चमहायज्ञाः गृहस्थैः करणीया एव । गृहस्थानां नित्यनैमित्तिककर्मसु पञ्चमहादोषाः आयन्ति । ते–

**खण्डिनी पेशिनी चुल्ली घृतकुम्भञ्च मार्जनी** इति पञ्चदोषैः गृहस्था अनुदिनमनुलिम्पन्ति । एतेषां परिहारोपायः एव पञ्चमहायज्ञाचरणविधिः । एतेषु पञ्चसु यज्ञेषु देवयज्ञः श्रेष्ठतमो वर्तते । स च यज्ञः त्रिविधः, सत्त्वरजस्तमो भेदात् । तत्र सात्त्विकयज्ञो यथा –

**अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।**

**यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ।।**[१०] अर्थात् फलापेक्षारहितेन विधिनिर्दिष्टयज्ञः यष्टव्यमेव इति मनस्तुष्ट्या यज्ञः इज्यते सः सात्त्विकयज्ञः ।

**अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।**

**इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ।।**[११]

अर्थात् फलाकाङ्क्षया कीर्तिप्रतिष्ठायै च इज्यमानः यज्ञः राजसयज्ञः ।

**विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।**

**श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ।।**[१२]

अश्रद्धया कृतयाज्ञिकविधिविधानं अन्नदानं मन्त्रोच्चारणं दक्षिणदानकर्म च यस्मिन् क्रियते सः तामसयज्ञः । इतोऽपि यज्ञः नानाविधो वर्तते । यथा–

**द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे ।**

**स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ।।**[१३]

यथा वेदे द्रव्ययज्ञाः प्रसिद्धाः तथा कालान्तरे दार्शनिककाले तपोयज्ञादयः यमनियमानुष्ठानसम्बन्धिनः तपोयज्ञाः, मुद्रासनप्राणायामाद्यनुष्ठानसम्बन्धिनः योगयज्ञाः, अध्ययनाध्यापनादि स्वाद्याययज्ञाः, अस्यैव नामान्तरं ब्रह्मयज्ञ इति तथा जीवब्रह्मणोः ऐक्यरूपात्मविचारो ज्ञानयज्ञाः । अत्र बहुवचनोल्लेखनोद्देश्यः एकस्मिन्नेव बहुविधाः वर्तन्ते इति । ज्ञानस्वरूपस्यैव दर्शनं महत्त्वं ब्रूते – **तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धापत्नी शरीरम्–इध्मम्–उरो वेदिर्लोमानि वर्हिर्वेदशिशखा हृदयं यूपः काम आज्यं मन्युः पशुः तपोऽग्नः दमश्शमयिता दक्षिणा वाग्धोत प्राण उद्गाता चक्षुरध्वर्युः, मनो ब्रह्मा, श्रोत्रमग्नीद्यावद्ध्रियते सा दीक्षा यदश्नाति तद्धविः यत्पिबति तदस्य सोमपानम्** ।[१४] इति ज्ञानयज्ञस्वरूपम् । **ज्ञानयज्ञस्सविज्ञेयो सर्वयज्ञोत्तमोत्तमः**[१५] **एवं बहुविधाः यज्ञाः वितता ब्रह्मणो मुखे** ।[१६] एवम् अनेकप्रकाराः यज्ञाः पूर्वस्मादेव ब्रह्मणः मुखादुत्पन्नाः प्रसिद्धाश्च । पूर्वकाले योगयज्ञादयः द्रव्ययज्ञे अङ्गभूता आसन् । यथा – आचमनविदेरनन्तरं प्राणायामविधिर्विधीयते । स एव योगयज्ञः, एकासने उपविश्य एकमन्त्रोच्चारणमेव तपोयज्ञः, दीर्घकालानुष्ठितसत्रेषु यजमानं सम्मुखीकृत्य आख्यायिकोपन्यासः चतुर्विधपुरुषार्थोपन्यासश्च ज्ञानयज्ञः । गौणीभूता द्रव्ययज्ञेतराः योगयज्ञादयः कालान्तरे (दार्शनिककाले) मुख्यरूपेण प्रसिद्धाः ।

**श्रेयान्द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परन्तप ।**

**सर्वं कर्माऽखिलं पार्थ ज्ञाने परिसमाप्यते ।।**[१७]

वेदोच्चिष्टं दार्शनिकज्ञानसर्वस्वमिति उक्ते नास्ति आश्चर्यविषयः । श्रौतोत्तुङ्गहिमगिरिशिखरात् वैचित्र्यादृजुकुटिलनानापथजुषदार्शनिकज्ञानगङ्गा प्रवहती प्रवहती परमानन्दरूपपयसामर्णवं प्राप्नोति ।

**सन्दर्भग्रन्थसूचि:**

१. ऋग्वेदसंहिता, चौखम्भा विद्याभवन्, वाराणसी ।

२. अमरकोश:, चौखम्बा संस्कृत सिरीज आफिस्, वाराणसी ।

३. महानारायणोपनिषत्, मन्त्रपुष्पम्, रामकृष्णमठ, कार, मुम्बई ।

४. गरुडपुराणम्, चौखम्भा विद्याभवन्, वाराणसी ।

५. शब्दकल्पद्रुम: । नागापब्लिकेशन्स्, देहली ।

६. श्रीमद्भगवद्गीता, चौखम्भा विद्याभवन्, वाराणसी ।

**फूटनोट :**

१. नीतिशतकम् ।

२. ऋग्वेद: – १.१.१ ।

३. ऋग्वेद: – ६.५८.१ ।

४. अमरकोश: – काण्ड: – २, ब्रह्मवर्ग:, श्लो–१३ ।

५. महानारायणोपनिषत् – मन्त्र:– ७९

६. अमरकोश: – काण्ड:–२, ब्रह्मवर्ग:–१४ ।

७. गरुडपुराणम् – अध्याय:–११५

८. हरीतस्मृति:।

९. शब्दकल्पद्रुम: ।

१०. श्रीमद्भगवद्गीता – अ–१७, श्लो.–११ ।

११. श्रीमद्भगवद्गीता – अ–१७, श्लो–१२ ।

१२. श्रीमद्भगवद्गीता – अ–१७, श्लो–१३ ।

१३. श्रीमद्भगवद्गीता – अ–४, श्लो–२८ ।

१४. महानारायणोपनिषत् – म–८० ।

१५. शाठ्यायणोपनिषत् – १६ ।

१६. श्रीमद्भगवद्गीता – अ–४, श्लो–३२१ ।

१७. श्रीमद्भगवद्गीता – अ–४, श्लो–३३ ।

आसि. प्रो. न्याय,

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम् ।